महाग्रीवः, पुं, ( महती दीर्घा ग्रीवा कन्धरा यस्य । ) उष्ट्रः । इति राजनिर्घण्टः ॥ (शिवः । यथा, महाभारते । १३ । १७ । ८६ ।
"महागर्भो महाकर्ण्णो महाग्रीवः श्मशान-भाक् ॥"
शिवानुचरभूतविशेषः । यथा, हरिवंशे भविष्यपर्व्वणि । १४ । ३ ।
"कुम्भोदरो महाग्रीवः स्थूलजिह्वो द्विबाहुकः ।
पार्श्वतः सिंहस्कन्ध उन्नतांसो महाहनुः ॥"
दैत्यविशेषः । यथा, मार्कण्डेये । ५८ । १७ ।
"व्याघ्रग्रीवा महाग्रीवा क्षौरपुरा श्मश्रु-धारिणः ॥")
वृहद्ग्रीवायुक्ते, त्रि ॥

महाघासः, पुं, महतो देशस्य महत्या भूमेर्वा घासः । इति मुग्धबोधव्याकरणटीकायां दुर्गादासः ॥

महाघूर्णा, स्त्री, ( महती घूर्णा शरीरभ्रमणं यस्याः ।) सुरा । इति शब्दचन्द्रिका ॥ (महती-चासौ घूर्णा चेति । ) अतिशयभ्रमिश्च ॥

महाघोरः, त्रि, ( महांश्चासौ घोरश्चेति । ) अतिशयभयानकः । यथा, शुद्धितत्त्वे ।
"यमद्वारे महाघोरे तप्ता वैतरणी नदी ।
ताञ्च तर्त्तुं ददाम्येनां कृष्णां वैतरणीञ्च गाम् ॥"

महाघोषं, क्ली, ( महान् घोषः कोलाहलो यस्मिन् । ) हट्टम् । इति मेदिनी । षे, ५६ ॥ वृहच्छब्दयुक्ते, त्रि ॥ यथा, महाभारते । १ । २२१ । ११ ।
"तेषां श्रुत्वा सभापालो भेरीं सान्नाहिकीं तथा ।
समाजघ्ने महाघोषां जाम्बूनदपरिष्कृताम् ॥")

महाघोषः, पुं, ( महांश्चासौ घोषश्चेति । ) अति-घोषणम् । इति मेदिनी । षे, ५६ ॥

महाघोषा, स्त्री, (महान् घोषो यस्याः । टाप् ।) कर्कटशृङ्गी । इति मेदिनी । षे, ५६ ॥ कुन्दुरुकी । इति शब्दचन्द्रिका ॥

महाङ्गः, पुं, ( महान्ति दीर्घाणि अङ्गान्यस्य ।) उष्ट्रः । इत्यमरः । २ । ९ । ७५ ॥ गोक्षुरकः । रक्तचित्रकः । इति राजनिर्घण्टः ॥ वृहदवयवयुक्ते, त्रि ॥ (यथा, महाभारते ।१३।१७।८३।
"स्वस्तिदः स्वस्तिभावश्च भागी भागकरो लघुः ।
उत्सङ्गश्च महाङ्गश्च महागर्भपरायणः ॥")

महाचञ्चुः, स्त्री, (महती चञ्चुरग्रमस्याः ।) शाकविशेषः । तत्पर्य्यायः । वृहच्चञ्चुः २ विषारिः ३ सुचञ्चुका ४ स्थूलचञ्चुः ५ दीर्घपत्री ६ दिव्यगन्धा ७ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कषायत्वम् । मलशोधनत्वम् । गुल्मशूलोदरार्शोऽर्त्तिविषनाशित्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥ पुं, वृहच्चञ्चुयुक्तपक्षी च ॥

महाचण्डः, पुं, ( महांश्चासौ चण्डश्चेति । ) यमभृत्यः । इति हेमचन्द्रत्रिकाण्डशेषौ ॥ प्रचण्डे, त्रि ॥

महाच्छदः, पुं, ( महान् छदः पत्रमस्य । ) देवताडवृक्षः । इति रत्नमाला ॥ वृहत्पत्रश्च ॥

महाच्छायः, पुं, ( महती छायास्य । ) वटवृक्षः । इति राजनिर्घण्टः ॥ वृहच्छायायुक्ते, त्रि ॥

महाच्छिद्रा, स्त्री, (महच्छिद्रमस्याः ।) महामेदा । इति राजनिर्घण्टः ॥ वृहच्छिद्रयुक्ते, त्रि ॥

महाजः, पुं, ( महांश्चासौ अजश्चेति । ) वृहच्छागः । ( महतो जायत इति । महत् + जन् + कर्त्तरि डः । पृषोदरादित्वात् साधुः । ) महाकुलोद्भवे, त्रि ॥

महाजटा, स्त्री, (महती जटास्याः ।) रुद्रजटा । इति राजनिर्घण्टः ॥ ( महती जटा । ) वृहज्जटा च ॥

महाजनः, पुं, ( महांश्चासौ जनश्चेति । ) साधुः । यथा, महाभारते । ३ । ३१२ । ११२ ।
"वेदा विभिन्नाः स्मृतयो विभिन्ना
नासौ मुनिर्यस्य मतं न भिन्नम् ।
धर्म्मस्य तत्त्वं निहितं गुहायां
महाजनो येन गतः स पन्थाः ॥"
मन्वादिः । यथा,—
"प्रायेण वेद तदिदं न महाजनोऽयं
देव्या विमोहितमतिर्ब्बत माययालम् ।
त्रय्यां जडीकृतमतिर्मधुपुष्पितायां
वैतानिके महति कर्म्मणि युज्यमानः ॥"
इति श्रीभागवते षष्ठस्कन्धे अजामिलोपाख्याने यमवाक्यव्याख्याने श्रीधरस्वामी ॥ (धनी । यथा, मृच्छकटिके । १ ।
"सङ्गं नैव हि कश्चिदस्य कुरुते सम्भाष्यते नादरात्
संप्राप्तो गृहमुत्सवेषु धनिनां सावज्ञमालोक्यते ।
दूरादेव महाजनस्य विहरत्यल्पच्छदो लज्जया
मन्ये निर्धनता प्रकाममपरं षष्ठं महापातकम् ॥")

महाजवः, पुं, (महान् जवो वेगो यस्य ।) गवयः । शीकारी मृगः । इति राजनिर्घण्टः । अतिवेगयुक्ते, त्रि ॥ (यथा, श्रीमद्भागवते । ७।८।२८।
"कृत्वाट्टहासं खरमुत्स्वनोल्वणं
निमीलिताक्षं जगृहे महाजवः ॥"
स्त्री, कुमारानुचरगणविशेषः । यथा, महाभारते । ९ । ४६ । २२ ।
"शशोलूकमुखी कृष्णा खरजङ्घा महाजवा ॥")

महाजम्बुः, स्त्री, ( महती चासौ जम्बुश्चेति । ) वृहज्जम्बुवृक्षः । यथा,—
"महाजम्बुर्महापत्रा राजजम्बुर्वृहत्फला ॥"
इति रत्नमाला ॥

महाजम्बूः, स्त्री, ( महती चासौ जम्बूश्चेति । ) वृहज्जम्बुः । तत्पर्य्यायः । राजजम्बुः २ स्वर्णमाता ३ महाफला ४ पिकप्रिया ५ कोकिलेष्टा ६ महानीला ७ वृहत्फला ८ । अस्य गुणाः । उष्णत्वम् । मधुररसत्वम् । कषायत्वम् । श्रमहरत्वम् । झटित्यास्यजड़िमनाशित्वम् । स्वरकरत्वम् । विष्टम्भित्वम् । शोषशमनत्वम् । श्रमातीसारार्त्तिवर्द्धकत्वम् । श्वसितकफकासप्रशमनत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"फलेन्द्रः कथितो नन्दो राजजम्बुर्महाफला ।
तथा सुरभिपत्रा च महाजम्बूरपि स्मृता ॥
राजजम्बूफलं स्वादु विष्टम्भि गुरु रोचनम् ।"
इति भावप्रकाशः ॥

महाजातिः, स्त्री, ( महती जातिरस्या इति । यद्वा, महती जातिरिव तदाकृतित्वात् । ) वासन्ती लता । इति राजनिर्घण्टः ॥ (महती जातिरिति । ) श्रेष्ठवंशश्च ॥

महाजातीयः, त्रि, ( महत् + "प्रकारवचने जातीयर् ।" ५ । ३ । ६९ । इति जातीयर् । ततः । "आन् महतः समानाधिकरणजातीययोः ।"६।३।४६। इति महतः आकारादेशः ।) महान् प्रकारः । इति व्याकरणम् ॥

महाजाली, स्त्री, ( जालयति आच्छादयतीति । जाल आच्छादने + पचाद्यच् । स्त्रियां ङीष् । ततः । महती चासौ जाली चेति । यद्वा, महांश्चासौ जालश्चेति स अस्या अस्ति अर्श आद्यच् ततः ङीष् । इत्यमरटीकायां रभसः ।) पीतवर्णघोषा । इत्यमरः । २ । ४ । ११७ ॥ राजकोशातकी । इति राजनिर्घण्टः ॥ वृहज्जालवाहके, त्रि ॥

महाज्यैष्ठी, स्त्री, ( महती चासौ ज्यैष्ठी चेति । ) नक्षत्रविशेषादियुक्तज्यैष्ठीपूर्णिमा । सा पञ्चधा । यथा, ब्रह्मपुराणे ।
"ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा ।
पूर्णिमा गुरुवारेण महाज्यैष्ठी प्रकीर्त्तिता ॥
ऐन्द्रे ज्येष्ठायां प्राजापत्ये रोहिण्याम् ॥ १ ॥
विना गुरुवारेणापि ।
ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा ।
पूर्णिमा ज्यैष्ठमासस्य महाज्यैष्ठी प्रकीर्त्तिता ॥२॥
अनुराधास्थगुरावपि ।
ऐन्द्रे मैत्रे यदा जीवस्तत्पश्चदशके रविः ।
पूर्णिमा शक्रचन्द्रेण महाज्यैष्ठी प्रकीर्त्तिता ॥३॥
अनुराधास्थे चन्द्रेऽपि । व्याघ्रभूतिः ।
ऐन्द्रर्क्षे त्वथवा मैत्रे गुरुचन्द्रौ यदा स्थितौ ।
पूर्णिमा ज्यैष्ठमासस्य महाज्यैष्ठी प्रकीर्त्तिता ॥४॥
राजमार्त्तण्डे ।
ज्यैष्ठे संवत्सरे चैव ज्यैष्ठमासस्य पूर्णिमा ।
ज्येष्ठाभेन समायुक्ता महाज्यैष्ठी प्रकीर्त्तिता ॥५॥
ज्यैष्ठसंवत्सरश्च ।
ज्येष्ठामूलोपगे जीवे वर्षं स्यात् शक्रदैवतम् ।
इति विष्णुधर्म्मोत्तरोक्तो ग्राह्यः ।
न तु संवत्सरादिपञ्चकान्तर्गतवर्षविशेषः । ज्यैष्ठ इति वर्षविशेषणस्य वैयर्थ्यापत्तेः । संवत्सरे यदि स्यादिति पाठः काल्पनिकः ॥ * ॥
महाज्यैष्ठ्यान्तु यः पश्येत् पुरुषः पुरुषोत्तमम् ।
विष्णुलोकमवाप्नोति मोक्षं गङ्गाम्बुमज्जनात् ॥"
इति तिथ्यादितत्त्वम् ॥

महाज्योतिष्मती, स्त्री, (महती चासौ ज्योतिष्मती चेति । ) लताविशेषः । बड़ी मालकङ्गनी इति हिन्दी भाषा । तत्पर्य्यायः । तेजोवती २ बहुरसा ३ कनकप्रभा ४ तीक्ष्णा ५ सुवर्णनकुली ६